# Shrikrishnadevi Mantratmaka Kavacham

# શ્રીકૃષ્ણદેવીમન્ત્રાત્મકકવચમ્

## Document Information

Text title : Shrikrishnadevi Mantratmaka Kavacham

File name : shrIkRRiShNadevImantrAtmakakavacham.itx

Category : devii, devI, dashamahAvidyA, kavacha, mantra

Location : doc_devii

Transliterated by : Durga Sharma

Proofread by : Durga Sharma

Latest update : June 20, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 20, 2026

*sanskritdocuments.org*

# શ્રીકૃષ્ણદેવીમન્ત્રાત્મકકવચમ્

॥ વિનિયોગઃ ॥

અસ્ય શ્રીકૃષ્ણદેવીમન્ત્રાત્મકકવચમન્ત્રસ્ય ।
શક્તિ ઋષિઃ ।
અનુષ્ટુપ્છન્દઃ ।
શ્રીકૃષ્ણદેવી તારિણી દેવતા ।
ક્રીँ બીજમ્ ।
ક્લીँ શક્તિઃ ।
હ્રીँ કીલકમ્ ।
સર્વાભીષ્ટસિદ્ધ્યર્થે પાઠે વિનિયોગઃ ॥

॥ ધ્યાનમ્ ॥

કૃષ્ણાં રક્તામ્બરધરાં નાગયજ્ઞોપવીતિનીમ્ ।
ત્રિનેત્રાં વરદાં દેવીં તારિણીં પ્રણમામ્યહમ્ ॥

॥ કવચમ્ ॥

ક્રીँ બીજં મે શિરઃ પાતુ કાલીરૂપા સનાતની ।
ક્લીँ બીજં લલાટે પાતુ કામકલ્પદ્રુમપ્રભા ॥ ૧॥

કૃષ્ણદેવી દૃશૌ પાતુ ત્રૈલોક્યજ્ઞાનદાયિની ।
હ્રીँકારરૂપિણી દેવી કર્ણયુગ્મં સદાવતુ ॥ ૨॥

ક્રીँકારી નાસિકાં પાતુ ક્લીँકારી વદનં મમ ।
તારિણી જિહ્વિકાં પાતુ વાગ્વૈભવપ્રદાયિની ॥ ૩॥

હ્રીँકારમયી મે દન્તાન્ રક્તવર્ણા સદાવતુ ।
દેવી કણ્ઠં સદા પાતુ મહામાયાવિમોહિની ॥ ૪॥

ક્રીँ ક્લીँ હ્રીँ હૃદયં પાતુ સર્વતન્ત્રૈકગોપિતમ્ ।

કૃષ્ણદેવી સ્તનદ્વન્દ્વં પરાશક્તિઃ સદાવતુ ॥ ૫॥

નાભિં મે તારિણી પાતુ બ્રહ્માણ્ડામ્ભોજમધ્યગા ।
કટીં કાલપ્રિયા પાતુ યોગિનીકોટિસેવિતા ॥ ૬॥

ગુહ્યં મે ગુહ્યવિદ્યા ચ પાતુ નિત્યં પરાત્પરા ।
ઊરૂ મે વિજયાપાતુ જઙ્ઘે પાતુ જયપ્રદા ॥ ૭॥

જાનુની મે મહાવિદ્યા ગુલ્ફૌ સિદ્ધિપ્રદાયિની ।
પાદૌ મે પાતુ સતતં કૃષ્ણદેવી મહેશ્વરી ॥ ૮॥

રક્તામ્બરા પૂર્વતો માં દક્ષિણે ભીષણાનના ।
પશ્ચિમે પાતુ માં તારા ઉત્તરે જ્ઞાનરૂપિણી ॥ ૯॥

આગ્નેયે કાલિકા પાતુ નૈરૃત્યે ભૈરવી મમ ।
વાયવ્યે પાતુ મે દુર્ગા ઐશાન્યાં તારિણી સ્વયમ્ ॥ ૧૦॥

ઊર્ધ્વે બ્રહ્મમયી પાત્વધસ્તાત્ ભુવનેશ્વરી ।
અન્તર્બહિશ્ચ માં પાતુ કૃષ્ણદેવી નિરન્તરમ્ ॥ ૧૧॥

ક્રીँકારઃ પાતુ મે પ્રાણાન્ ક્લીँકારઃ પાત્વપાનકમ્ ।
હ્રીँકાર ઉદાનરૂપશ્ચ સમાનં વ્યાનમેવ ચ ॥ ૧૨॥

મનો બુદ્ધિં તથા ચિત્તમહઙ્કારં ચ સર્વદા ।
કૃષ્ણદેવી સદા પાતુ મહાઘોરાપિ સુન્દરી ॥ ૧૩॥

વિદ્યાયાં પાતુ માં નિત્યં વાદે પાતુ સરસ્વતી ।
યુદ્ધે પાતુ મહાકાલી સભાયાં વિજયપ્રદા ॥ ૧૪॥

રાજદ્વારે મહાદેવી સઙ્ગ્રામે શત્રુમર્દિની ।
અરણ્યે નિર્જને ઘોરે તારિણી માં સદાવતુ ॥ ૧૫॥

જલે સ્થલે ચ ગગને સ્વપ્ને જાગરણે તથા ।
ક્રીँ ક્લીँ હ્રીँ ત્રયં પાતુ કૃષ્ણદેવ્યાઃ પરં વપુઃ ॥ ૧૬॥

ઇદં મન્ત્રાત્મકં દિવ્યં કવચં મન્ત્રવિગ્રહમ્ ।
ક્રીँ ક્લીँ કૃષ્ણદેવી હ્રીँ ક્રીँ ઐँ ઇતિ સ્વરૂપકમ્ ॥ ૧૭॥

॥ ઇતિ શ્રીકૃષ્ણદેવીમન્ત્રાત્મકકવચં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Durga Sharma

*Shrikrishnadevi Mantratmaka Kavacham*

pdf was typeset on June 20, 2026

Please send corrections to *sanskrit@cheerful.com*